# Ratikrita Shambhu Stuti

# રતિકૃતા શમ્ભુસ્તુતિઃ

## Document Information

Text title : Ratikrita Shambhu Stuti

File name : shambhustutiHratikRRitA.itx

Category : shiva, gaNeshapurANa, stuti

Location : doc_shiva

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 88 | 1.88 5-21||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# રતિકૃતા શમ્ભુસ્તુતિઃ

રતિરુવાચ ।
નમામિ દેવં ગિરિજાસહાયં વૃષધ્વજં ભાલવિલોચનં ચ।
યઃ પાતિ લોકાન્ ખલુ સત્ત્વયુક્તો નિર્માતિ લોકાન્ રજસા ગુણેન ॥ ૫॥

યઃ સ્વેચ્છયા સંહરતેઽખિલેશો જગત્ તમોવિષ્ટતનુર્મહેશઃ ।
યો નુઃ કપાલં વહતે જનાનાં ભિક્ષાશનઃ પૂરયતેઽખિલાર્થાન્ ॥ ૬॥

દીનાનુકમ્પી ભગવાન્ મહેશો ગતપ્રિયાયાઃ શરણં મમાસ્તામ્ ।
કર્તું તથાઽકર્તુમદીનસત્ત્વઃ શક્રોઽન્યથા કર્તુમપીહ દેવઃ ॥ ૭॥

સ મે વિધત્તાં શરણં ગતાયા સૌભાગ્યમુચ્ચૈર્મૃતજીવનેન ।
નો ચેદહં પ્રાણવિસર્જનેન યશઃ કરિષ્યે વિપરીતમીશ ॥ ૮॥

બ્રહ્મોવાચ ।
એવં તયા સ્તુતઃ શમ્ભુઃ પ્રસન્નસ્તામથાબ્રવીત્ ।
શમ્ભુરુવાચ ।
વરં વૃણુ મહાભાગે કામપત્નિ ! શુભાનને ॥ ૯॥

દદામિ તુષ્ટઃ સ્તોત્રેણ સર્વાન્ કામાન્ હૃદિ સ્થિતાન્ ।
ઇત્થં શિવવચઃ શ્રુત્વા રતિર્હૃષ્ટા પ્રણમ્ય તમ્ ॥ ૧૦॥

સૌભાગ્યકામા તં દેવં નિજગાદ ભૃશાતુરા ।
રતિરુવાચ ।
સ્વામિન્ ! યદિ પ્રસન્નશ્ચેચ્છૃણુ મે પરમં વચઃ ॥ ૧૧॥

રસાયાં દિવિ ભૂમૌ વા કાન્તાઃ સ્યુઃ કામિનીગુણાઃ ।
મમ લાવણ્યલેશો ન તેષુ ક્વાઽપિ ત્રિલોચન ! ॥ ૧૨॥

માં દૃષ્ટ્વા મુમુચુઃ શક્રમુખ્યા વીર્યમપત્રપાઃ ।
તતો મે મહતી લજ્જા જાતા મે તામપાકુરુ ॥ ૧૩॥

લાવણ્યં ચ વૃથા જાતં વિના કામેન શઙ્કર ।
અયશો દહતે મહ્યં રતિઃ સા વિધેવતિ ચ ॥ ૧૪॥

ભર્તુદાનેન દેવેશ ! માં જીવય દયાનિધે ! ।
એવં તયા પ્રાથિતોઽસૌ શઙ્કરો લોકશઙ્કરઃ ॥ ૧૫॥

ઉવાચ શ્લક્ષ્ણયા વાચા હર્ષયન્ કામયોષિતમ્ ।
શિવ ઉવાચ ।
ચિન્તા માં કુરુ કલ્યાણિ ! ન લજ્જાં કર્તુમર્હસિ ॥ ૧૬॥

સ્મૃતમાત્રસ્ત્વયા બાલે કામઃ સ્યાદ્ દૃષ્ટિગોચરઃ ।
મનસા ચિન્તિતો વાપિ મનોભૂરિતિ સંજ્ઞિતઃ ॥ ૧૭॥

પૂરયિષ્યતિ તે કામાન્ માન્યા ત્વં ચભવિષ્યસિ ।
વિષ્ણોઃ સકાશાદુત્પત્તિં રમાયાં પ્રાપ્સ્યતે યદા ॥ ૧૮॥

ભર્તા તવ જને ખ્યાતો નામ્ના પ્રદ્યુમ્નસંજ્ઞિતઃ ।
ભવિષ્યતિ મહાભાગે ! ગચ્છેદાનીં નિજાલયમ્ ॥ ૧૯॥

સાઽઽગતા શિવવાક્યેન મન્દિરં ભૃશસુન્દરમ્ ।
સસ્માર તં પતિં સા તુ પુરોઽનઙ્ગઃ સમાયયૌ ॥ ૨૦॥

ઈશ્વરેચ્છાવશાત્ તસ્યાઃ પ્રત્યક્ષં સમજાયત ।
ઇતિશ્ચાશ્ચર્યયુક્તા સા જહૃષે પતિના સહ ॥ ૨૧॥

ઇતિ રતિકૃતા શમ્ભુસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૮૮ । ૧.૮૮ ૫-૨૧॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 88 . 1.88 5-21..

Proofread by Preeti Bhandare

*Ratikrita Shambhu Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*